Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 6 | ISSN : 2581- 6306

# व्याकरणशास्त्रे ईश्वरचन्द्र-विद्यासागरस्य योगदानम्

Pradip Sing
Research Scholar, Department of Vyakarana
National Sanskrit University,Tirupati, Andhra Pradesh, India

**सारांश**:–विश्वस्य प्राचीनतमास्वखिलासु भाषासु संस्कृतं सर्वस्यापि अतिशेते इत्यत्र न कस्यापि वैमत्यम्। वस्तुतोऽस्यवैशिष्टस्य हेतुषु अस्या: व्याकरणं प्रामुख्यं भजते, येनाद्यापीयं भाषाऽक्षुण्णरूपेण विराजमाना सर्वान् भारतीयान् वैदेशिकान् अपि च सम्मोहयति।ब्राह्मणेन निष्कारेण धर्म: षडङ्गो वेदोऽध्येयो ज्ञेयश्च, प्रधानं हि षडङ्गेषु व्याकरणम्, प्रधाने हि कृतो यत्न: फलवान् भवति इति वचनेन व्याकरणमेव वेदस्य प्रधानाङ्गं फलितम्।व्याकरणशास्त्रे पाणिनीयव्याकरणं सर्वातिशायि विश्वप्रसिद्ध: वर्तते। पाणिनीयव्याकरणस्य सहजबोधार्थं प्रक्रियामार्गे अनेका: वैयाकरणा: व्याकरणग्रन्थं विरचितवन्त:। तेषु मुख्यं भवति भट्टोजिदीक्षितेन विरचित: वैयाकरणसिद्धान्तकौमुदी इति नामक: ग्रन्थ:। प्रक्रियामार्गैव बङ्गप्रदेशे संस्कृतानुरागी सर्वेषां सहजरूपेण व्याकरणं शिक्षार्थं बङ्गनवजागरणस्य प्रात:स्मरणीय: मनीषी पण्डित: ईश्वरचन्द्र–विद्यासागर: महोदय: पाणिनिव्याकरणम् आधारीकृत्य ग्रन्थद्वयं विरचितम्। अत: संस्कृतव्याकरणशास्त्रे ईश्वरचन्द्र–विद्यासागरस्य योगदानम् इति विषयमाधारीकृत्य मया लेखेऽस्मिन्विचार: विहित:।

**विशेषशब्दा**:- विद्यासागरस्य परिचयकार्यकालकृतयश्च, व्याकरणशास्त्रे योगदानम्, संस्कृत व्याकरणस्य उपक्रमणिका, समग्र व्याकरणकौमुदी इत्यादय:।

---

**शब्दा**:- विद्यासागरस्य परिचयकार्यकालकृतयश्च, व्याकरणशास्त्रे योगदानम्, संस्कृत व्याकरणस्य उपक्रमणिका, समग्र व्याकरणकौमुदी इत्यादय:।

---

'व्याकरणं' वेदपुरुषस्य मुख्यत्वेन स्वीक्रियते। वि आङ् इत्युपसर्गद्वयपूर्वकात् 'डु कृञ् करणे'[1]इति धातो: 'करणाधिकरणयोश्च[2]' इति सूत्रेण ल्युटि अनादेशे गुणे च व्याकरणम् इति सिद्ध्यति। 'व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन इति व्याकरणम्[3]' – इत्यपि उच्यते। अर्थात् व्याकरणेन साधुशब्दज्ञानं भाषाशुद्धि: च जायते। व्याकरणस्यापरं नाम शब्दशास्त्रमपि वर्तते।व्याकरणस्य मुख्य: सम्बन्ध: पदैरेव, न तु वाक्यैर्न वा वर्णै:, अत: व्याकरणं

---

1 . धा.पा. तनादिगण:, धातु: 10

2 . अष्टा. 3-3-117

3. महाभाष्यम् पस्पशाह्निकम्

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

पदशास्त्रमप्युच्यते।व्याकरणशास्त्रं नितान्तं प्राचीनं वर्तते। रामायणे सर्वप्रथमं यदा रामेण सह हनुमतः सङ्गमोऽभवत्, तदा हनुमद्वाक्यशुद्धिं वीक्ष्य भगवान् श्रीरामो लक्ष्मणं प्रत्याह –

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।**

**बहु व्याहरताऽनेन न किञ्चिदपभाषितम्।।**[4]

महाभारतस्योद्योगपर्वणि त्रेतायुगे महर्षिव्यासेन निर्दिष्टं यत् –

**सर्वार्थानां व्याकरणाद् वैयाकरण उच्यते।**

**तन्मूलती व्याकरणं व्याकरोतीति तत्तथा।।**[5]

व्याकरणं वेदस्य मुख्य स्थानीयं मतं –'मुखं व्याकरणं स्मृतम्'[6] इति। वेदेङ्गानि च षडाहु व्याकरणम् –

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**[7]

व्याकरणशास्त्रस्य साधुज्ञानं विना वेद, वेदाङ्ग, स्मृति, पुराण, काव्यादिषु शास्त्रेषु शास्त्रान्तरेषु वा सुगमतया प्रवेशो दुर्लभः, यस्य कस्यापि शास्त्रस्य, शास्त्रान्तरस्य वा अध्ययनं क्रियते न वा व्याकरणशास्त्रस्याध्ययनमवश्यकर्तव्यतया करणीयम्। व्याकरणं योऽधीते, स शास्त्राण्यधिगन्त्यं समर्थो भवतीति। अतः व्याकरणस्य विषये एवम् उच्यते –

**यद्यपि बहुनाधीषे, तथापि पठ पुत्र व्याकरणम्।**

**स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्।।**[8]

व्याकरणशास्त्रे पाणिनीयव्याकरणं सर्वातिशायि विश्वप्रसिद्धः वर्तते। अस्य ग्रन्थस्य वैज्ञानिकतां दृष्ट्वा विद्वांसः पाणिनिं महासङ्गणकः (Super Computer)इत्याख्यया विभूषयन्ति। अतः उक्तमस्ति –

**पाणिनीयं शब्दशास्त्रं पदसाधुत्वलक्षणम्।**

**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन।।**

---

4. रामा. 4-3-29

5. म.भा. उ.प. 42 - 60

6 पाणिनीयशिक्षाः

7 पाणिनीयशिक्षाः 41-42

8 . सु.भा.प्रकरणमं वेकरणाप्रशंसा,श्लो.सं. 12

पाणिनीयव्याकरणे अष्ठाध्यायीनामकग्रन्थे प्रायः चतुस्सहस्रसूत्राणि वर्तन्ते, तत्र षड्विधानि विभक्तानि सूत्राणि सन्ति तानि च –

**संज्ञा च परिभाषा च विधिर्नियम एव च।**

**अतिदेशोऽधिकारश्च षड्विधं सूत्र लक्षणम्।।**[9]

अस्य पाणिनीयव्याकरणस्य त्रिमुनिव्याकरणम् इति नामान्तरम् अस्ति –

**वाक्यकारं वररुचिं भाष्याकारं पतञ्जलिम्।**

**पाणिने सूत्रकारञ्च प्रणितोऽस्मि मुनित्रयम्।।**

पाणिनीयव्याकरणस्य सहजबोधार्थं, लोकप्रियकरणार्थञ्च नैकाः वैयाकरणाः अष्टाध्यायी इति ग्रन्थस्य सूत्राणां पूनर्व्याख्यानं कृतवन्तः। प्रक्रियापरम्परायां त्रिमुनि व्याकरणम् आधारीकृत्य बहवः वैयाकरणाः व्याकरणग्रन्थं विरचितवन्तः। तेषु मुख्यं भवतिभट्टोजिदीक्षितेन विरचितः वैयाकरणसिद्धान्तकौमुदी इति नामकः ग्रन्थः। समग्रभारतवर्षे तस्य ग्रन्थस्य पठनपाठनरवः प्रसिद्धः मुख्यरूपेण श्रूयते। सर्वेषां सूत्राणां समावेशनं, प्रक्रियारूपेण सन्निवेशनमस्याः सिद्धान्तकौमुद्याः वैशिष्ट्यम्।

वैदिकभाषानुशीलनं भित्तिमादाय अतिप्राचीनकालात् भारतवर्षे व्याकरणचर्चायाः शुभारम्भो भवति। बङ्गप्रदेशे अञ्चलविशेषे पाणिनीयः व्याकरणस्य विस्तृतिः अध्ययनम् अध्यापना च अव्याहतस्थितेऽपि साधारणभावेन पाणिनीयसूत्रस्य संक्षिप्तरूपान्तरं देशेऽस्मिन् जनप्रियमासीत्। प्राचीनबङ्गे सर्वाग्रे येषां संक्षेपितव्याकरणानां नामानि प्राप्तानि तेषु सर्वाग्रे मैत्रेयरक्षितस्य नामोल्लेखयोग्यम्। मैत्रेयरक्षितस्य विरचितं धातुप्रदीपः, दुर्घटवृत्तिः, पुरूषोत्तमदेवस्य भाषावृत्तिः, परिभाषावृत्तिः, कारकचक्रः, शर्ववर्माविरचितं कातन्त्रव्याकरणं, वोपदेवस्य मुग्धवोधव्याकरणं, त्रयोदशशतके क्रमदीश्वरस्य संक्षिप्तसारव्याकरणं, पद्मनाभदत्तस्य सुपद्मव्याकरणं, काशीनाथविद्यानिवासस्य शिशुबोधव्याकरणं, परमानन्दसेनस्य चैतन्यामृतव्याकरणं नामकः पाणिने सारसंक्षेपः उल्लेखयोग्यं प्रचलितञ्च। कातन्त्रः वा कलापव्याकरणं पूर्वबङ्गे, मुग्धबोधव्याकरणं पश्चिमबङ्गप्रदेशे विशेषजनप्रियमासीत्। मध्ययुगेबङ्गप्रदेशे व्याकरणचर्चा[10] इत्युक्ते प्रधानतः अस्य समूहस्य व्याकरणस्य टीकाभाष्यं मूलमासीत्। आधुनिककाले ऊनविंशशतके भरतसेनविरचितं द्रूतबोधव्याकरणं, तारानाथतर्कवाचस्पतेः आशुबोधव्याकरणं, परम्परायामेव बङ्गनवजागरणस्य प्रातः स्मरणीय–पण्डित–ईश्वरचन्द्र–विद्यासागर[11]–विरचितं‘संस्कृत व्याकरणोपक्रमणिका’‘समग्र व्याकरणकौमुदी’ इत्यादिश्च ग्रन्थानां मध्ये विद्यासागर–विरचितं ग्रन्थद्वयम् अव्याहतभावेन बङ्गोत्तरप्रदेशेऽपि प्रचलति[12]।

---

[9]लघु सिद्धान्तकौमुदी

[10]. सं.सा.वा.दा.

[11]. अ.अ.वि.

[12]. वा.भा.व्या.क्र.

- **ईश्वरचन्द्र-विद्यासागरस्यपरिचयकार्यकालकृतयश्च**

भारतराष्ट्रस्य पूर्वभागः बङ्गप्रदेशः इत्युक्ते अधुना पश्चिमबङ्गराज्ये मेदिनीपुरमण्डलस्य वीरसिंह नाम इति ग्रामे सेप्टेम्बरमासस्य षड्विंशतितमदिवसे 1820 खीष्टाब्दे एकस्मिन् दरिद्रब्राह्मणकुले ईश्वरचन्द्रवन्दोपाध्यायः जन्म लब्धवान्। पितुः नाम ठाकुरदास वन्दोपाध्यायः माता च भगवतीदेवी। पञ्चमे वत्सरे ईश्वरचन्द्रस्य विद्यारम्भः ग्राम्यपाठशालायाम् अभवत्। ग्राम्यपाठशालापाठं समाप्य, स नवमेवर्षे वयसि पिता ठाकुरदासवन्दोपाध्यायेन सह कलिकाताम् आगत्य 1829 खीष्टाब्दे ईश्वरचन्द्रः अध्ययनार्थं संस्कृतमहाविद्यालये प्राविशत्। प्रवेशानन्तरं संस्कृतभाषा तथा संस्कृतशास्त्रविषये अध्ययनं कृतवान्। पञ्चमासाधिकद्वादशवत्सरं यावत् व्याकरणं, साहित्यम्, अलङ्कारशास्त्रं, वेदान्तशास्त्रं, न्यायशास्त्रं, ज्योतिषशास्त्रं स्मृतिशास्त्रम् इत्यादि विषये ज्ञानलाभं कृतवान्। तत्र परिश्रमेन मेधावलेन प्रतिवर्षं महाविद्यालये उन्नतस्थानमधिकृत्य ईश्वरचन्द्रः संस्कृतमहाविद्यालयस्य अन्तिमपरीक्षायमुत्तीर्य पाठं समाप्य द्वाविंशतिवयसि अर्थात् 1841 खीष्टाब्दे संस्कृतमहाविद्यालयः कर्तृपक्षः तेषां कृते 'विद्यासागरः' इत्युपाधिं प्रशंसापत्रं च प्रदत्तवान्[13]। विद्यासागरमहोदयस्यप्रथमोद्योगः 1841 खीष्टाब्दे फोर्ट-उयलियाम्-महाविद्यालये अध्यापकरूपेण, अनन्तरं 1850 तमे वर्षे संस्कृतमहाविद्यालयस्य साहित्यविषये अध्यापकः सञ्जातः, 1851 तमे वर्षे अध्यक्षपदं लब्धवान्। भारतभूमौ लब्धजन्मेषु सर्वेषु महापुरूषेषु ईश्वरचन्द्र-विद्यासागरः, यस्य पूर्वसंज्ञा आसीत् ईश्वरचन्द्रवन्दोपाध्यायः यश्च युगपुरुषरूपेण स्मर्यते। महापुरुषोऽयम् आधुनिककालस्य महान् पण्डितः, शिक्षाविद्, स्मृतिशास्त्रमर्मज्ञः, दार्शनिकः, मानवतावादी, समाजसंस्कारश्च आसीत्। बङ्गप्रदेशे बङ्गगद्यभाषायाः समृद्ध्यर्थं, संस्कृतभाषा संस्कृतसाहित्यञ्च विकाशे, संस्कृतव्याकरणशिक्षणविकाशे ईश्वरचन्द्र-विद्यासागरस्य योगदानं परिलक्ष्यते।

ईश्वरचन्द्र-विद्यासागरमहोदयेनसंस्कृतसाहित्ये सप्तदश, आङ्गल् भाषायां पञ्च, बङ्गभाषायां त्रिंशत् मिलित्वा द्वापञ्चाशत् पुस्तकानि विरचितानि। तेषां मध्ये संस्कृतव्याकरणविषये ग्रन्थद्वयमेव रचितम् - i) संस्कृत व्याकरणोपक्रमणिका,ii) समग्र व्याकरणकौमुदी।

- **व्याकरणशास्त्रे ईश्वरचन्द्र-विद्यासागरस्य योगदानम्**

प्राचीनयुगमध्ययुगयोर्मध्ये बङ्गप्रदेशे पाणिनीयव्याकरणस्य चर्चाविषये प्रमाणं बङ्गीयविरचितम् अष्टाध्यायीक्रमानुसारि संस्कृतव्याकरणं तस्य टीका भाष्यादिः[14]।

अपाणिनीयव्याकरणसम्प्रदायसङ्कुले बङ्गप्रदेशे झटिति पाणिनीयव्याकरण-सम्प्रदायस्य विकाशं भवितुं नार्हति। परन्तु भारतवर्षस्य इतरप्रान्तेषु सर्वत्र पाणिनीयपरम्परा व्याकरणस्य चर्चा वर्धमाना। तेन बङ्गप्रदेशस्य

---

13. मा,र,ई.वि. - पृ. 27

14 . सं.सा.वा.दा. - पृ. 238

संस्कृतचर्चाया: संयोगसाधने पाणिनीयपरम्परा उपयोगी भवेत् इति विचिन्त्य ये विद्वांस: वैयाकरणा: आजीवनं कृतप्रयत्ना: आसन् तेषु प्रात:स्मरणीय: मनीषी पण्डित  ईश्वरचन्द्रविद्यासागरस्य योगदानम् उल्लेखयोग्यम्।

ऊनविंशशतकब्द्याम् अस्माकं भारतवर्षराष्ट्रस्य पूर्वभाग: बङ्गप्रदेश: इत्युक्ते अधुना पश्चिमवङ्ग: इति प्रदेशे व्याकरणस्य चर्चाया: बहुनां व्याकरणग्रन्थानां पठनपाठनं प्रचलितमासीत्। पाणिनीयव्याकरणस्य प्रसार: बङ्गप्रदेशे सर्वत्र तादृश: नासीत्। तस्मिन् समये आचार्य: ईश्वरचन्द्र-विद्यासागर: महोदय: पाणिनीयपरम्पराया: प्रसारे अन्यतम: पथिकृत: आसीत्। व्याकरणस्य प्रयोजनं शास्त्राध्यायने न केनापि शक्यम् अस्वीकृतञ्च। परन्तु महती पाणिनीय परम्परा वालानां सुखबोधाय अन्तरायभूता। इदानीं पाणिनीय परम्परा इतरव्याकरणापेक्षया काठिण्यं तं त्यक्त्वा इति न समीचीनम्। तस्मात् एव कारणात् पाणिनीयसिद्धान्तमनुसृत्यबङ्गप्रदेशस्य संस्कृतशिक्षार्थीनां, वालानां सहजभावेन अनायासेन संस्कृतव्याकरणविषयस्यशिक्षणं लाभार्थं ग्रन्थद्वयं विरचितम्। तद्यथा - 1. **'संस्कृत व्याकरणस्य उपक्रमणिका'(1851)** 2. **'समग्र व्याकरणकौमुदी' (1853)**।

ग्रन्थद्वये प्रतिपाद्यविषये समैक्यतापरिलक्ष्यते। संस्कृत व्याकरणस्य उपक्रमणिकायां ये विषया: वीजरूपेण, सूक्ष्मरूपेण, सूत्रविहीन-व्याख्यारूपेण अधिका: लौकिका: उदाहरणेन सन्ति, तेषामेव विषयानां वृक्षरुपेण, स्थूलरूपेण, सूत्रसहितव्याख्यारूपेणैव समग्रव्याकरणकौमुदीग्रन्थे विवृयते। ग्रन्थद्वयस्य लेखनशैली एवं वर्तते यत् - आगमनविधि: निगमनविधेयश्च। आगमनविधि: अर्थात् उदाहरणपूर्विका व्याख्या। निगमनविधेयश्च प्रयोग: व्याकरणकौमुद्यां परिभाषा, कारक-विभक्तिनिर्णय:, तद्धितप्रत्यय:, स्त्रीप्रत्यय:, समासनिर्णय: विषये उपस्थाप्यते।

- **संस्कृतव्याकरणस्यउपक्रणिका -**

नव्यव्याकरणस्य कौमुदी परम्परा नवीनविद्यार्थिन: सूत्रवृत्ति उदाहरणादिनां कण्ठस्थीकरणेन संस्कृतभाषाज्ञानस्य लक्ष्यस्थलं न प्राप्नुवन्ति। तस्मात् एव कारणात् अस्मिन् ग्रन्थे सूत्रवृत्तिणां समावेश: तेन न कृत:।

विद्यार्थेषु संस्कृतव्याकरणस्य प्राथमिकज्ञानं सम्पादयितुम् एव 'संस्कृत व्याकरणस्य उपक्रमणिका' इति ग्रन्थस्य निर्माणं कृतवान्।

किमर्थं पाणिनीय सूत्रपरम्परां विहाय आचार्येन उपक्रणिका विरचिता इति चेत् उच्यते यद्, तदानीं वैदेशिका: अपि प्राच्यज्ञानं सम्पादयितुं संस्कृतशिक्षाया: अनुरक्ता आसन्। तेषां कृते सुलभतया संस्कृतभाषाज्ञानम् उद्पादयितुं पण्डिता: बहुनां संस्कृतव्याकरणग्रन्थानां संरचनं कृतवान्। तेषु ग्रन्थेषु सूत्रभाष्यवर्जिता सहज-सरल-व्यवहारिक: उदाहरणेन व्याख्यारूपेन इयम् उपक्रमणिकाविशिष्टं स्थानं लभ्यते।

अस्मिन् उपक्रमणिकाग्रन्थे प्रकरणानुसारेण व्याकरणस्य विषया: वर्णिता: सन्ति। तत्र आदौ वर्णनिर्णय:, वर्णस्योच्चारणस्थानम्। तदन्तरं सन्धिप्रकरणं, णत्वविधानं, षत्वविधानं, सुवन्तप्रकरणं, विभक्तिस्याकृति: स्वरान्तव्यञ्जणान्तशब्दानां रूपंलिङ्गत्रये। सर्वनामशब्द:, संख्यावाचकशब्द:, अव्ययशब्द:, स्त्रीलिङ्गप्रत्यय:, कारक:, अर्थविशेष-शब्दविशेषयोगे विभक्तिनिर्णय:, विशेष्य-विशेषणम्, तिङन्तप्रकरणम्, अकर्मकक्रिया, सकर्मकक्रिया, धातुरूप:, कर्तृवाच्यं, कर्मवाच्यं, भाववाच्यं, कृदन्तशब्द:, समास:, तद्धितप्रत्यय:इत्यादय: विषया: सुलभतया वर्णिता:। अस्य ग्रन्थस्य अध्ययनेन सामान्यमतिवालका: अनायासेन प्राथमिक संस्कृत ज्ञानं सम्पादयितुम्

अर्हन्ति। तस्मात् बङ्गप्रदेशे संस्कृतशिक्षा प्रसाराय तथा वैदेशिकानाम् अपि संस्कृतानुरागजनने अस्य ग्रन्थस्य महत् अवदानम् अनस्वीकार्यम्।

- **समग्रव्याकरणकौमुदी -**

प्राचीन वैयाकरणानां माहेश्वर-सूत्र-रूपवर्ण-स्थापनपद्धतिं विहाय सूत्ररचना अस्य ग्रन्थस्य मुख्यं वैशिष्ट्यम्। माहेश्वरसूत्राणि वस्तुत: प्रत्याहारनिर्माणे बेतुभूतानि पाणिनिना विरचितानि बहुनि सूत्राणि प्रत्याहारमूलकानि यथा – '**अक: सवर्णे दीर्घ:**[15]''**इको यणचि**[16]' इत्यादिषु सूत्रेषु प्रत्याहारा: एव मुख्या:। इदानीम् आचार्य-विद्यासागर-प्रणीते "समग्र व्याकरणकौमुदी" इत्याख्ये ग्रन्थे माहेश्वरसूत्राणि न स्थापितानि। तस्माद् अस्मिन् ग्रन्थे प्रत्याहारस्य अपेक्षा नास्ति। परन्तु छात्राणां सुलभबोधाय आचार्येन पाणिनि-सूत्राणि एव भिन्नतया पुन: स्थापितानि। अत्र किमर्थम् एवं प्रत्याहारवर्जनेन पाणिनीय-सूत्राणाम् अर्थं स्वीकृत्य सुलभभाषाया: पुन: सूत्राणि भाषितानि तस्मिन् विषये कारणद्वयं परिलक्ष्यते।

प्रथमत: मन्दमति छात्राणाम् आशुबोधाय माहेश्वरसूत्रतत्वानि क्लेशकरं भवितुमर्हति इति विचिन्त्य विद्यासागर-महाभागेन एवं प्रकारेण प्रयत्न: विहित:।

द्वितीयत: आचार्य: विद्यासागर: महोदय: मूलत: पाणिनिव्याकरणस्य सूत्राणि सरलानि कर्तुं प्रयत्नं कृतवान्। दीर्घकारसूत्रस्य स्वल्पाकारं, बहुनां सूत्राणां समाहाररूपेण एकसूत्रम्, गूढस्वल्पकायसूत्राणां झटिति प्रतीत्यर्थं रूपान्तरितं नवरूपेण वा निर्मितम्। न केवलं पूर्वाचार्याणां सूत्राणामपि तु अनुक्तस्थाने स्वसूत्रमपि विरचितम्। बहुषु सूत्रेषु तस्य स्वातन्त्रता वर्तते।

आचार्यस्यईश्वरचन्द्रविद्यासागरस्य विशेषावदानमिदमस्ति यत् स: संस्कृतव्याकरणशिक्षार्थं सरलोपायेन "व्याकरणकौमुदी" इति ग्रन्थं विरचितवान्। ग्रन्थेऽस्मिन् भागचतुष्टयं परिलक्ष्यते।

प्रथमभागे प्रतिपाद्यविषया: – 1. वर्णनिर्णय:, 2. परिभाषा, 3. सन्धिनिर्णय:, 4. णत्वविधान-षत्वविधानम्, विशेष्य-विशेषणम्, 5. सुबन्तप्रकरणम्, 6. सर्वनाम्नशब्द:, संख्यावाचकशब्द:, 7. अव्ययम् इत्यादय:।

द्वितीयभागे प्रतिपाद्यविषया:- तिङन्तप्रकरणे -विभक्तिस्याकृति:, धातुविभाग:, साधारणनियम:,तुदादि - भ्वादि - दिवादि - स्वादि - तनादि - क्र्यादि - रुधादिगणीय: धातुनां विषये प्रतिपादितम्।

तृतीयभागे प्रतिपाद्यविषया: - 1. अदादि - ह्वादिगणौ 2. प्रत्ययान्त - णिजन्त - सन्नन्त - यङ्लुगन्त - नामधातुनां, परस्मैपद, आत्मनेपद विधानम्, कर्म्मवाच्य - भाववाच्य - कर्म्मकर्त्तृवाच्य प्रकरणम्, लकारार्थ निर्णय: 3. कृत्प्रकरणम् इत्यादय:।

चतुर्थभागे प्रतिपाद्यविषया: 1. कारकविभक्ति: 2. तद्धितप्रत्यय: 3. स्त्री-प्रत्यय: 4. समासनिर्णय: इत्यादय:।

---

15 . अष्टा. 6-1-101

16 . अष्टा. 6-1-77

प्रथम–द्वितीय–तृतीयभागत्रये संस्कृतव्याकरणस्य परिभाषाप्रकरणं विहाय व्याख्यारूपेण सहजसरल: व्यावहारिक: अनेक:लौकिक: उदाहरणेन विषयाणां स्वरूपम् आलोचितमस्ति।चतुर्थभागे कारकप्रकणम्, तद्धितप्रकरणम्, स्त्रीप्रत्ययप्रकरणम्, समासप्रकरणमिति प्रकरणानां सूत्रात्मकालोचनं विद्यते। व्याकरणकौमुद्यां 851 सूत्राणि सन्ति। तेषु 167 सूत्राणि पाणिने:, कात्यायनस्य 18 वार्तिकानि एवं च 666 सूत्राणि विद्यासागरेण नवरूपेण निर्मितानि पाणिनिसूत्रम् आधारीकृत्य। एतेषु परिभाषाप्रकरणे 27 सूत्राणि, कारकविभक्तिप्रकरणे 123 सूत्राणि, तद्धितप्रत्यप्रकरणे 319 सूत्राणि, स्त्रीप्रत्ययप्रकरणे 64 सूत्राणि, समासप्रकरणे 318 सूत्राणि विद्यन्ते।

- **व्याकरणकौमुदीग्रन्थे प्रथमभागस्य प्रतिपाद्यविषय: -**

**वर्णनिर्णय:**- वर्णविषये ईश्वरचन्द्रमहाभागेन उच्यते यत् – अ इ उ, क् ख् ग् एतेषां प्रत्येकं वर्ण: इत्युच्यते। स च द्विविध: स्वरवर्णव्यञ्जनवर्णश्चेति।

**स्वरवर्ण:** -अ आ इ ई उ ऊ ऋ ॠ ऌ ए ऐ ओ औ इति त्रयोदशवर्णा: स्वरवर्ण: इत्युच्यते। एतेषु अ इ उ ऋ ऌइति पञ्चवर्णाह्रस्वस्वरयुता:, अन्ये दीर्घस्वरयुता: भवन्ति। ऌकारस्य दीर्घ: नास्ति।

**व्यञ्जनवर्ण:** - क् ख् ग् घ् ङ् च् छ् ज् झ् ञ्, ट् ठ् ड् ढ् ण्, त् थ् द् ध् न्, प् फ् ब् भ् म्, य् र् ल् व् श्, ष् स् ह्: इति पञ्चत्रिंशत् वर्णा: व्यञ्जनवर्ण: इति निगदिता:, तन्मध्ये ककारादारभ्य मकारपर्यन्तम् एते पञ्चत्रिंशतिवर्णा: स्पर्शवर्ण: इत्युच्यते। क् ख् ग् घ् ङ् इति कवर्ग:, क्रमश: पञ्चपञ्चा: चवर्ग:, टवर्ग:, तवर्ग:, पवर्ग: रूपेण ज्ञायते। य् व् र् ल् एतेषां चर्तुणाम् अन्त:स्थवर्णाख्यम्। श् ष् स् ह् एतेषां वर्णानाम् उष्मवर्ण:, अनुस्वार: विसर्गस्य च विद्यासागरप्रणीतव्याकरणग्रन्थे अयोगवाहवर्णरूपेण गृह्यते।

**वर्णस्य उच्चारणस्थानानि**–वर्णानाम् उच्चारणस्थानविषये सर्वेषु व्याकरणग्रन्थेषु अयं विषय: चर्चित:। नायं ग्रन्थ: व्यतिक्रम:। पाणिनीयव्याकरणानुसारेण इदं ग्रन्थे वर्णानाम् उच्चारणविषय: उपस्थाप्यते।

**सन्धिप्रकरणम् –** वर्णद्वयस्य परस्परमेलनमेव सन्धि:[17] इत्युच्यते। व्याकरणकौमुद्यां स्वरसन्धि:, व्यञ्जनसन्धि:, अपि च विसर्गसन्धि: इति त्रिधा विभक्त:। यत्र स्वरवर्णेन सह स्वरवर्णस्य सन्धि: स स्वरसन्धि:, व्यञ्जनेन सह स्वर: व्यञ्जनमिति व्यञ्जनसन्धि:। विसर्गेण सह स्वर: व्यञ्जनमिति विसर्गसन्धि: इत्युच्यते।

**स्वरसन्धि:** -i) यदि अकाराद्वा आकाराद्वा परम् अकार: आकार: भवति तर्हि मिलित्वा आकार: भवति तच्च पूर्ववर्णेन सह भवति[18]। यथा – शश+अङ्क: = शशाङ्क:, दया+अर्णव:=दयार्णव: इत्यादयश्च।

**व्यञ्जनसन्धि:** -i) यदि तकारस्य अथवा दकारस्य स्थाने यदि चकार: अथवा छकार: भवति तर्हि तयो: स्थाने चकार: भवति[19]। यथा – भवत्+चरणम्=भवच्चरणम्, तद्+छवि: = तच्छवि: इत्यादय:।

---

[17]. पर: सन्निकर्ष: संहिता 1–4–109

[18]. अक: सवर्णे दीर्घ: 6–1–101

[19]. स्तो: श्चुना श्चु: 8–4–40

**णत्वविधानम् -** णत्वविधानमित्युक्ते नकारस्य स्थाने णकारविधानं, पाणिनीयव्याकरणे णत्वविधानार्थं बहुनि सूत्राणि सन्ति। तदनुकरणेनैव एते त्रयविंशति क्रमानुक्रमेन णत्वविधानं निर्णयविषये प्रतिपादितम्। ते नियमाः-

i) ऋ, ॠ, र, ष इत्येतेभ्यः चतुर्भ्यः परं नकारस्य णकारः भवति[20]। यथा - भ्रातृ+ नाम् = भ्रातृणाम्।

**षत्वविधानम् -** षत्वविधानमित्युक्ते सकारस्य स्थाने षकारादेशः। षत्वविधानविषये पाणिनीयव्याकरणे बहुनि सूत्राणि सन्ति।तदनुकरणेनैव एते चर्तुविंशति क्रमानुक्रमेन षत्वविधानं निर्णयविषये प्रतिपादितम्। ते नियमाः -

i) अकारः, आकारः भिन्नः स्वरवर्णः, एवं ककारः रकारः इत्येतेभ्यः वर्णेभ्यः परं प्रत्ययस्य सकारस्य षकारादेशः भवति[21]। यथा - नदी+सु = नदीषु।

**सुवन्तप्रकरणम् -** प्रातिपदिकात्परं सप्तविभक्तयः, विभक्तियुक्तशब्दस्य सुबन्तमपि च पदसंज्ञा भवति। प्रत्येकस्मिन् विभक्तौ वचनत्रयं भवति। अत्रादौ स्वरान्त-पुलिङ्गशब्दानां उदाहरणं दृश्यते। तद्वत्स्त्रीलिङ्गशब्दानामपि नपुसकलिङ्गशब्दानां च रूपाणि सन्ति। ततःपरं व्यञ्जनान्तशब्दानां रूपाणि, सर्वनामशब्दानां रूपाणि, संख्यावाचकशब्दानां रूपाणि सन्ति।

**अव्ययशब्दः –**येषां शब्दानामुत्तरे विभक्तिः नास्ति, तस्य परिवर्तनमपि नास्ति कदापि, तेषाम् अन्ते स्थितस्य रकारसकारयोः विसर्जनीयस्स्यात्। एते शब्दाः अव्ययसंज्ञकाः। सिद्धान्तकौमुद्यां अयमेव विषयः प्रोक्तः -

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्[22]।।**

क्रियायोगे विंशत्यव्ययाः उपसर्गसंज्ञाः स्युः। **गतिश्च**[23] इति सूत्रेण पाणिनीयव्याकरणे प्रतिपादितं वर्तते। सिद्धान्तकौमुद्यां यथा निस् दुस् इत्यनयोरपि उपसर्गसंज्ञाः स्युः व्याकरणकौमुद्यां तथा न स्वीकृतम्।

- **व्याकरणकौमुदीग्रन्थे द्वितीय-तृतीयभागस्य प्रतिपाद्यविषयः -**

**तिङन्तप्रकणम्** - क्रियावाचकप्रकृतिः अर्थात् मूलशब्दः धातुः भवति[24]। यथा - भू, गम्, दृश् इत्यादयः। धातोः परं दशविभक्तिः भवति। यथा - लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्ल-काराःइत्यादयः। प्रत्येकस्मिन् विभक्तौ वचनत्रयं, प्रथमपुरुष-मध्यमपुरुष-उत्तमपुरुषे दशगणादिक्रमे व्यवहारिकानां धातुनां रूपाणि स्थापितानि।

---

[20]. रषाभ्यां नो णः समानपदे 8-4-1

[21]. इण्कोः 8-3-57। आदेशप्रत्यययोः 8-3-59।

[22]. सि.कौ. पृ. 67

[23]. अष्टा. 1-4-60

[24]. भूवादयोः धातवः 1-3-1

**कृत्यप्रकरणम्** – धातोः परं तव्यत्, निष्टा, तुमुन् प्रभृतीनां प्रत्ययानां कृत्यप्रत्ययरूपेण अभिहितम्। कृत्यप्रत्ययः बहुविधः भवति। कृत्यप्रत्ययः क्रियायाः मतं प्रकाशितं भवति। व्याकरणकौमुद्यां प्रत्येकप्रत्ययस्य व्यवहारः नियमसहयोगेन अधिकोदाहरणेन विषयोपस्थाप्यते।

एवं रूपेण उपक्रमणिकाग्रन्थात् व्याकरणकौमुदीग्रन्थे पाणिनीयसूत्रस्य सहज–सरल–व्याख्यासहयोगेन अधिकोदाहरणेन भागत्रयस्य वर्णितविषयस्य विषयः विद्यते।

- **व्याकरणकौमुदीग्रन्थे चतुर्थभागस्य प्रतिपाद्यविषयः –**

**कारकविभक्तिनिर्णयः**– कारकविभक्तिनिर्णयविषये प्रथमो भवति विभक्तिरिति तदनन्तरं कारकविषये ग्रन्थे आलोचितम्। आचार्येणव्याकरणकौमुद्यां विभक्तिविधायकं सूत्रं प्रणीतम् – **'संख्याकारकादिबोधयित्री विभक्ति'**[25]रिति। यथा – घटः घटौ घटाः इति।अत्रः घटः इत्युक्ते एकत्वसंख्याविशिष्टः घटः, घटौ इत्युक्ते द्वित्वसंख्याघटः, घटाः इत्युक्ते बहुत्वसंख्याविशिष्टः घटः इति। विभक्तयः सप्त इति। कुत्र का विभक्तिः तदग्रे क्रमशः आलोच्यते।

**विभक्तिनिर्णये** व्याकरणकौमुद्यां सप्तसप्ततिः सूत्राणि परिलक्ष्यन्ते तन्मध्ये **'अभिधेयमात्रेप्रथमा**[26]**'** इति सूत्रं पाणिनिप्रणीतः अष्टाध्यायीतः **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रेप्रथमा**[27], सूत्रेण प्रथमाविभक्तिनिर्णयविषये उपस्थापितम्। तदैव वार्तिकेन वार्त्तिकमाधारीकृत्य **क्वचिन्निपातेनाभिधानम्**[28] इति सूत्रेण **'अव्यययोगे च'** इति सूत्रेण विरचितेन प्रथमाविभक्तिविषये आलोचितम्। यथा –

i) **अव्यययोगे च**[29]– इति प्रभृतीनां कतिपयानां योगेऽपि प्रथमाविभक्तिस्र्यात्। यथा – दशरथ इति ख्यातो नृपतिरासीत्, क्रमादमुं नारद इत्यबोधि सः[30] इति। सूत्रमिदं क्वचिन्नपातेनाभिधानम् इति वार्त्तिकमाधारीकृत्य सूत्रमिदं विरचितम्।

ii) **सम्बोधने च**[31] – सूत्रमिदं पाणिनीयव्याकरणस्य साक्षादनुकरणभूतम्। सम्बोधनं नाम अभिमुखीकरणम्। सम्बोधनेऽपि प्रथमाविभक्तिर्भवति। यथा – हे पिता!, हे राम ! इति।

---

25 . स.व्या.कौ. पृ. 465

26. स.व्या.कौ. पृ. 465

27 . अष्टा. 2-3-46

28 . वार्तिकम्

29 . स.व्या.कौ. पृ. 466

30. शिशुपालवधम्

31.अष्टा. 2-3-47

एवमेव प्रथमाविभक्तेः सप्तमीविभक्तिनिर्णयपर्यन्तं पाणिनिसूत्रं, वार्तिकमाधारीकृत्य, स्वविरचितसूत्रेण विभक्तिनिर्णयविषयम् उपस्थापितम्–

**'प्रत्यनुधिङ्निकषान्तरान्तरेणयावद्भिः'** सूत्रमिदं बहूनां सूत्राणां समाहाररूपम्। **कर्मप्रवचनीययुक्ते द्वितीया**[32], **अभितःपरितस्समयानिकषाहाप्रतियोगेऽपि**[33]**उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते**[34]।। एतेषां त्रयाणां समाहारे प्रकृतसूत्रमिदं विरचितम्।**पञ्चमी विभक्ते**[35] इति सूत्रस्य स्थाने **'निकृष्टादेकोत्कर्षे'**, **न लोकाव्ययनिष्टाखलर्थतृणाम्**[36] इति सूत्रस्य स्थाने **'न निष्टायाः'**इति सरलसूत्रं विरचितेण व्याख्यौदाहरणेन पञ्चमी–विभक्तिनिर्णयविषयः उपस्थाप्यते।

**कारकनिर्णये**षट्पञ्चाशत् सूत्राणि परिलक्ष्यन्ते,**'क्रियया सह यस्य सम्बन्धः, तत्कारकमित्युच्यते'** अर्थात् **'क्रियान्वयि कारकम्'**[37]अनेन सूत्रेण कारकं निर्धारितम्।षट् कारकाणि –

**अपादान-सम्प्रदान-करणाधारकर्म्मणाम्।**
**कर्त्तुश्चान्योऽन्यसन्देहे परमेकं प्रवर्त्तते।।**[38]

पण्डित विद्यासागरमहोदयः अष्टाध्यायी सूत्रपाठक्रमेण कारकाणां व्याख्या कृता यथा – आदावपादानं विषये क्रमेण सम्प्रदानम्–करणम्–अधिकरण्–कर्म–कर्तृ इति।

अपादानकारकनिर्णये व्याकरणकौमुद्यां **'यतोविश्लेषोऽपादानम्**[39]**'** इति सूत्रं पाणिनीसूत्रे **ध्रुवमपायेऽपादानम्**[40] इति सूत्रेण अपादानसंज्ञा विधीयते। एवंरूपेण पाणिनीसूत्रे**'कर्मणायमभिप्रैति स सम्प्रदानम्**[41] सूत्रस्य स्थाने **'यस्मै दानं सम्प्रदानम्**[42]**'**, **कर्त्तुरीप्सिततमंकर्म**[43] सूत्रस्य स्थाने **'क्रिययाक्रान्तं कर्म**[44]**'**, **स्वतन्त्रः कर्त्ता**[45] सूत्रे **'क्रियासम्पादकः कर्त्ता**[46]**'** इदं सूत्रं सहजे स्मरणार्थकं विरचितेन कारकनिर्णयविषय–व्याख्येन उदाहरणेन विषय उपस्थापितः।

---

[32]. अष्टा. 2–3–8
[33]. वार्तिकम् 1442–1443
[34]. वार्तिकम् 1444
[35] . अष्टा. 2–3–42
[36] . अष्टा. 2–3–69
[37] . स.व्या.कौ. पृ. 487
[38]. संक्षिप्तसारव्याकरणम्
[39]. स.व्या.कौ. पृ. 487
[40] . अष्टा. 1–4–24
[41] . अष्टा. 1–4–32
[42]. स.व्या.कौ. पृ. 490

**तद्धितप्रत्यप्रकरणम् –** अस्मिन् प्रकरणे 319 सूत्रेण तद्धितप्रत्ययनिर्णयविषयः निरूपितः। तद्धितप्रत्ययः इत्युक्ते पाणिनीव्याकरणस्य **तद्धिताः**[47] इति सूत्रेण तद्धितप्रत्ययाः निरूपिताः। पाणिनीसूत्राधारेण सरल–संक्षेपः उदाहरणेन नव्यसूत्रमपि व्याकरणकौमुदीग्रन्थे विरच्य कुत्र कुत्र तद्धितप्रत्ययः भवति तद्विषये आलोचितम्। एवञ्च सूत्रं सरलीकृतं, यथा – **'णितिवृद्धिराद्यस्य'** इति सूत्रम्**अचोञ्णिति**[48], **तद्धितेष्वचामादेः**[49]**किति च**[50] एतेषां त्रयाणां सूत्राणां विषयसमाहारे प्रकृतसूत्रमिदं विरचितम्। एवं प्रकारेण **तस्यापत्यम्**[51] इति सूत्रस्य स्थाने **'अपत्ये'**सूत्रेण विषयः प्रतिपादितः।

**स्त्रीप्रत्ययप्रकरणम्** -स्त्रियां प्रत्ययाः स्त्रीप्रत्ययाः। स्त्रीरूपार्थे ये प्रत्ययाः विधीयन्ते ते स्त्रीप्रत्ययत्वेन अभिधीयन्ते। तदपि **स्त्रियाम्**[52] इत्यधिकारे पाणिनीसूत्रेण व्याकरणकौमुद्यां स्त्रीप्रत्ययः विषयः प्रतिपादितः। व्याकरणकैमुदी ग्रन्थे आचार्यः विद्यासागरमहोदयः पञ्चषष्टिः सूत्रेण स्त्रीप्रत्ययः निर्णयविषयः प्रतिपादितः। पाणिनीव्याकरणस्य दीर्घसूत्रम्**इन्द्रवरूणभवशर्व्वरूद्रमृडहिमारण्ययवयवनमातुलाचार्य्याणामानुक्**[53] इति सूत्रस्य स्थाने **'भवादेरानीपौ'** सूत्रेण स्त्रीप्रत्ययः विषयः प्रतिपादितः। एवं रूपेण **श्वशुरस्योकाराकारलोपश्च**[54] इति वार्तिकमाधारीकृत्य **'श्वश्रः श्वशुरस्य'** सूत्रमिदं विरचितम्।

**समासप्रकरणम् -** समासनिर्णयविषये सारल्येन प्रोक्तं यत् –**"एकपदीभावःसमासः"**[55]। समासः षड् भेदाः– कर्मधारयः, तत्पुरूषः द्वन्दः, बहुव्रीहिः, द्विगु अव्ययीभावश्च। वस्तुतः कर्मधारयः द्विगु तत्पुरूषसमासस्य भेदः। समासनिर्णये अष्टादशाधिकत्रयशतं सूत्रं वर्तते। यथा –'लुग् विभक्तेः' अस्य सूत्रस्यार्थः भवति

---

43 . अष्टा. 1–4–49

44. स.व्या.कौ.पृ. 493

45 . अष्टा. 1–4–54

46. स.व्या.कौ. पृ. 496

47 . अष्टा. 4–1–76

48 . अष्टा. 7–2–115

49 . अष्टा. 7–2–117

50 . अष्टा. 7–2–118

51 . अष्टा. 4–2–92

52 . अष्टा. 4–1–3

53 . अष्टा. 4–1–49

54 . वार्तिकम्

55 . स.व्या.कौ.पृ. 601

समासान्तर्गतपदसमूहानां विभक्तीनां लोपः भवति। अस्य सूत्रस्य विषयः अष्टाध्याय्याः **सुपो धातुप्रातिपदिकयोः**[56] इत्यस्मात् सूत्रात् स्वीकृतः। एवमेव पाणिनीयव्याकरणस्य सूत्रं **न-लोपः प्रातिपदिकान्तस्य**[57] इत्यस्य स्थाने **'नस्य लोपः पूर्वस्य'**,**अव्ययंविभक्तिसमीपसमृद्धिवृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद् यथानुपूर्व्ययौगपद्यसादृश्यस्पत्तिसाकल्यान्तवचनेषु**[58] सूत्रस्य स्थाने **'सुपाव्ययं समीपादौ'**, **पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन**[59] सूत्रस्य स्थाने **'न पुरणार्थैः'**, **'नगुणवाचिभिः'**, **'न तृप्तर्थैः'** सूत्रत्रयं विरच्य पाणिनीसूत्रस्य विषयः प्रतिपादितः। एवंरूपेण समासप्रकरणस्य दीर्घसूत्रं सरलं खण्डनं कृत्वा समासविषये स्वयं विरचितं व्याकरणकौमुदीग्रन्थे आलोचितम्।

संस्कृतधारा अतीते वेद-रामायण-शाकुन्तलादौ काले असंख्याभिः स्त्रोतधाराभिः पुष्टशरीरा हिमालयात् बङ्गसमुद्रं यावत् प्रवहन्ती ब्रह्मपुत्रधारेव बहुव्यापिनी विस्तृतकारा आसीत्। किन्तु कालान्तरे अधुना स्वल्पधीमनुष्यानां कृते संस्कृतशिक्षा दौर्वोध्यं जटिलशुष्कप्रायेव सञ्जाता। अद्य खलु सैव क्षिप्रं शुष्यन्ती राजस्थानमरौ विलुप्ता सरस्वतीमनुसन्तरीव प्रतीयते। अनेकेषु कारणेषु संस्कृतव्याकरणस्य जटिलता दीर्घव्यापकता च अन्यतमं कारणम्। इन्द्रादयो देवाः व्यासवाल्मीक्यादयः ऋषयः महाव्याकरणकर्त्तारोऽपि संस्कृतव्याकरणस्यान्तं पारं न प्राप्तवन्तः। तस्य समग्रस्य शब्दवारिधेः प्रक्रियां शब्दव्युत्पादनविद्यां ज्ञातुं न शक्तवन्तः। महाभाष्यधृतप्रमाणं बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रप्रतिपदोक्तानां शब्दानां शाब्दपारायणं प्रोवाच नान्तं जगाम। अतः अल्पधीमनुष्याणां प्राथमिकतया व्याकरणज्ञानार्थं सहज-सरल-संक्षेपतः व्याकरणं कथनीयम्। एतदर्थं पाणिनेः परवर्त्तीकालेः बहवः वैयाकरणाः संस्कृतव्याकरणस्य सहज-सरल-रूपप्रदानार्थं प्रयत्नं कृतवन्तः। आचार्यः वरदराजः तस्य लघुसिद्धान्तकौमुद्यां मङ्गलाचरणे आह -

**नत्वां सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम्।**
**पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम्।।** इति।

पण्डित ईश्वरचन्द्रविद्यासागरोऽपि बङ्गभाषायां तस्य "उपक्रमणिका","व्याकरणकौमुदी" इति व्याकरणग्रन्थद्वये सहजतया सरलतया संक्षेपेण च व्याकरणस्य मूलतः पाणिनीव्याकरणस्य सूत्राणि सरलानि कृतवान्। दीर्घकारसूत्रं स्वल्पाकारं, गूढस्वल्पकायसूत्रं झटितिप्रतीत्यर्थं रूपान्तरितं नवरुपेन वा निर्मितम्। न केवलं पूर्वाचार्याणाम् अपितु अनुक्तस्थाने स्वसूत्रमपि विरचितवान्। तस्य केषु सूत्रेषु स्वातन्त्रता वर्तते। विद्यासागरस्य व्याकरणकौमुदी पण्डितानां कृते नास्ति अपि तु नवशिक्षार्थीनां कृते विद्यते। तस्य ग्रन्थः न केवलं बङ्गीयभाषीणां

---

56 . अष्टा. 2-4-71

57 . अष्टा. 8-2-7

58 . अष्टा. 2-1-6

59 . अष्टा. 2-2-11

कृते अपि तु समग्रसंस्कृतशिक्षार्थीनामपि लाभदायकं भविष्यति इति। एवमेव मया अल्पमतिना सारल्येन संक्षेपेण च यथामति लेखो विचारितः।

- **संक्षेताक्षरसूची**

अष्टा. – अष्टाध्यायी
अ.अ.वि. – अनन्य अद्वितीय विद्यासागर
रामा. – रामायणम्
पा.शि. – पाणिनीय शिक्षा
वा.भा.व्या.क्र. – वाङ्लाभाषा व्याकरण ओ क्रमविकाश
म.भा.उ.प.– महाभारतम् (उद्योगपर्वम्)
मा.र.ई.वि. – मानवरत्न ईश्वरचन्द्र विद्यासागर
स.सा.वा.दा. – संस्कृत साहित्ये वाङालीर दान
स.व्या.कौ. – समग्र व्याकरणकौमुदी
सि.कौ – सिद्धान्तकौमुदी

- **सहायकग्रन्थसूची**


1. अनन्य अद्वितीय विद्यासागर – अमलेश मिश्र, दे पावलिकेशन्स, कलिकाता – 2019
2. अष्टाध्यायी- डा. नरेश झा, चौखम्बा सुरभारती प्रकाशन्, वाराणसी – 2006
3. वाङ्लाभाषा व्याकरण ओ क्रमविकाश –डा. निर्मल दाश, संस्कृत पुस्तक भाण्डार, कलिकाता – 2003
4. महाभारतम् – सम्पा. उषा शर्मा, मानसी प्रकाशन्, मीरट – 1990
5. मानवरत्न ईश्वचन्द्र–विद्यासागर – मौसम मजुमदार, तपती पाबलिकेशन्स, कलिकाता – 2019
6. सिद्धान्तकौमुदी (मूलमात्रम्) –सम्पा. गोविन्दाचार्यः, चोखम्बा सुरभारती प्रकाशन्, वाराणसी 2015
7. संस्कृत व्याकरणस्योपक्रमणिका – पं. गोपालचन्द्र वेदान्तशास्त्री, चोखम्बा विद्याभवन, वाराणसी 1961
8. संस्कृत व्याकरणकौमुदी – पं. गोपालचन्द्र वेदान्तशास्त्री, चौखम्बा विद्याभवन, वाराणसी 1962
9. संस्कृत व्याकरण प्रवेशिका (ईश्वचन्द्र–विद्यासागर प्रणीत संस्कृत व्याकरण उपक्रमणिका ग्रन्थस्य संस्करणम्) – सम्पा. रमेश भरद्वाज, श्री वत्सशास्त्री, अमरजी झा, विद्यानिधि प्रकाशन, दिल्ली 2009
10. संस्कृत व्याकरण उपक्रमणिका – ईश्वरचन्द्र विद्यासागर, संस्कृतयन्त्रः, कलिकाता – 1908
11. समग्र व्याकरणकौमुदी – श्रीयुक्त दुर्गाचरण सांख्य–वेदान्ततीर्थ, संस्कृत पुस्तक भाण्डार, कलिकाता – 2010
12. संस्कृत व्याकरणशास्त्रेतिहासविमर्शः – डा. अशोकचन्द्र गौड शास्त्री, भारतीय विद्यासंस्थानम्, वाराणसी 1977
13. संस्कृत साहित्ये बाङालीरदान – सुरेशचन्द्र वन्दोपाध्याय, संस्कृत पुस्तक भाण्डार, कलिकाता – 1369 बङ्गाब्दः
14. संस्कृत साहित्येर इतिवृत्तः – डा. गोपेन्दु मुख्योपाध्याय, इउनाइटेड वुक एजेन्सी, कलिकाता 1419 बङ्गाब्दः
15. Sanskrit Culture of Bengal – Suresh Chandra Banerjee, Sharada Publishing House, Delhi 2004